# Sanakadi Rishibhih Kritam Varahastotram

# સનકાદિ ઋષિભિઃ કૃતં વરાહસ્તોત્રમ્

## Document Information

Text title : Sanakadi Rishibhih Kritam Varahastotram

File name : sanakAdiRRiShibhiHkRRitaMvarAhastotram.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe pUrvabhAge 6/11-22

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

# સનકાદિ ઋષિભિઃ કૃતં વરાહસ્તોત્રમ્

ઋષય ઊચુઃ ।
નમસ્તે દેવદેવાય બ્રહ્મણે પરમેષ્ઠિને ।
પુરુષાય પુરાણાય શાશ્વતાય જયાય ચ ॥ ૧॥

નમઃ સ્વયમ્ભુવે તુભ્યં સ્રષ્ટ્રે સર્વાર્થવેદિને ।
નમો હિરણ્યગર્ભાય વેધસે પરમાત્મને ॥ ૨॥

નમસ્તે વાસુદેવાય વિષ્ણવે વિશ્વયોનયે ।
નારાયણાય દેવાય દેવાનાં હિતકારિણે ॥ ૩॥

નમોઽસ્તુ તે ચતુર્વક્ત્રે શાર્ઙ્ગચક્રાસિધારિણે ।
સર્વભૂતાત્મભૂતાય કૂટસ્થાય નમો નમઃ ॥ ૪॥

નમો વેદરહસ્યાય નમસ્તે વેદયોનયે ।
નમો બુદ્ધાય શુદ્ધાય નમસ્તે જ્ઞાનરૂપિણે ॥ ૫॥

નમોઽસ્ત્વાનન્દરૂપાય સાક્ષિણે જગતાં નમઃ ।
અનન્તાયાપ્રમેયાય કાર્યાય કરણાય ચ ॥ ૬॥

નમસ્તે પઞ્ચભૂતાય પઞ્ચભૂતાત્મને નમઃ ।
નમો મૂલપ્રકૃતયે માયારૂપાય તે નમઃ ॥ ૭॥

નમોઽસ્તુ તે વરાહાય નમસ્તે મત્સ્યરૂપિણે ।
નમો યોગાધિગમ્યાય નમઃ સઙ્કર્ષણાય તે ॥ ૮॥

નમસ્ત્રિમૂર્તયે તુભ્યં ત્રિધામ્ને દિવ્યતેજસે ।
નમઃ સિદ્ધાય પૂજ્યાય ગુણત્રયવિભાગિને ॥ ૯॥

નમોઽસ્ત્વાદિત્યવર્ણાય નમસ્તે પદ્મયોનયે ।
નમોઽમૂર્ત્તાય મૂર્તાય માધવાય નમો નમઃ ॥ ૧૦॥

ત્વયૈવ સૃષ્ટમખિલં ત્વય્યેવ લયમેષ્યતિ ।

પાલયૈતજ્જગત્સર્વં ત્રાતા ત્વં શરણં ગતિઃ ॥ ૧૧॥

ઇત્થં સ ભગવાન્ વિષ્ણુઃ સનકાદ્યૈરભિષ્ટુતઃ ।
પ્રસાદમકરોત્તેષાં વરાહવપુરીશ્વરઃ ॥ ૧૨॥

ઇતિ કૂર્મપુરાણે પૂર્વભાગે ષષ્ઠાધ્યાયાન્તર્ગતં
સનકાદિ ઋષિભિઃ કૃતં વરાહસ્તોસ્ત્રં સમાપ્તમ્ ।
કૂર્મપુરાણે પૂર્વભાગે ૬/૧૧-૨૨

Proofread by PSA Easwaran

*Sanakadi Rishibhih Kritam Varahastotram*
pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*